# 38 - अष्टात्रिंश दशकम्
# श्रीकृष्ण अवतारमं

आनन्द रूप भगवन् अयि तेऽवतारे
प्राप्ते प्रदीप्त भवदङ्ग निरीय माणैः ।
कान्ति व्रजै रिव घनाघन मण्डलैर् द्याम्
आवृण्वती विरु रुचे किल वर्ष वेला ॥ ॥38-1॥

आशासु शीतल तरासु पयोदतोयैः
आशासि ताप्ति विवशेषु च सज्जनेषु ।
नैशाक रोदय विधौ निशि मध्यमायां
क्लेशापहस् त्रिजगतां त्व मिहा विरासीः ॥ ॥38-2॥

बाल्य स्पृशाऽपि वपुषा दधुषा विभूतीः
उद्यत् किरीट कटकाङ्गद हार भासा ।
शङ्खारि वारिज गदा परिभासि तेन
मेघासितेन परिलेसिथ सूति गेहे ॥ ॥38-3॥

वक्षस् स्थली सुख निलीन विलासि लक्ष्मी
मन्दाक्ष लक्षित कटाक्ष विमोक्ष भेदैः ।
तन् मन्दिरस्य खल कंसकृता मलक्ष्मीम्
उन्मार्जयन् निव विरेजिथ वासुदेव ॥ ॥38-4॥

शौरिस्तु धीर मुनि मण्डल चेतसोऽपि
दूरस्थितं वपु रुदीक्ष्य निजेक्षणाभ्याम् ॥
आनन्द वाष्प पुलकोद्गम गद्गदार्द्रः
तुष्टाव दृष्टि मकरन्द रसं भवन्तम् ॥ ॥38-5॥

देव प्रसीद पर पूरुष तापवल्ली
निर्लूनि दात्र सम नेत्र कला विलासिन् ।
खेदा नपाकुरु कृपा गुरुभिः कटाक्षैः
इत्यादि तेन मुदितेन चिरं नुतोऽभूः ॥ ॥38-6॥

मात्रा च नेत्र सलिलास्तृत गात्रवल्या
स्तोत्रै रभिष्टुत गुणः करुणालयस् त्वम् ।
प्राचीन जन्म युगलं प्रतिबोध्य ताभ्यां
मातुर् गिरा दधिथ मानुष बाल वेषम् ॥ ॥38-7॥

त्वत् प्रेरितस् तदनु नन्द तनूजया ते
व्यत्यास मारचयितुं स हि शूरसूनुः ।
त्वां हस्तयो रधृत चित्त विधार्य मार्यैः
अम्भोरुहस्थ कलहंस किशोर रम्यम् ॥ ॥38-8॥

जाता तदा पशुप सद्मनि योग निद्रा ।
निद्रा विमुद्रित मथाकृत पौरलोकम् ।
त्वत् प्रेरणात् किमिव चित्र मचेतनैर् यत्
द्वारैस् स्वयं व्यघटि सङ्घटितैस् सुगाढम् ॥ ॥38-9॥

शेषेण भूरि फण वारित वारिणाऽथ
स्वैरं प्रदर्शित पथो मणि दीपितेन ।
त्वां धारयन् स खलु धन्यतमः प्रतस्थे
सोऽयं त्वमीश मम नाशय रोग वेगान् ॥ ॥38-10॥